Shodhshauryam, International Scientific Refereed Research Journal
© 2019 SHISRRJ | Volume 2 | Issue 5 | ISSN : 2581- 6306

# सुखददाम्पत्यजीवने विवाहविचार

प्रो. प्रभातकुमारमहापात्रः
आचार्यः, विभागाध्यक्षश्च, ज्योतिषविभागः, राष्ट्रियसंस्कृतसंस्थानम्, श्रीरणवीरपरिसरः, जम्मू

ज्योतिषशास्त्रं भारतीयप्राचीनविद्यायां अन्यतमम्।ज्योतिषां सूर्यादिग्रहनक्षत्रादीनां ज्योतिः ज्ञापकम् इति । ज्योतितः उत्पत्स्यमान परिणामानां ज्ञापकं इति च ज्ञायते । आकाशे अस्माभिः प्रतिदिनं दृश्यमानानां ग्रहनक्षत्रादीनां कान्तिकिरणानि तेषां प्रभावश्च अर्थात् राशयः भूमण्डले विद्यमानानां चराचरणां विषये समग्रतया ज्ञापकं शास्त्रं ज्योतिश्शास्त्रम् ।

**वेदस्य निर्मलं चक्षुः ज्योतिश्शास्त्रमकल्मषम् ।**
**विनैतदखिलं श्रौतं स्मार्त्तं कर्म न सिध्यति ।।**

ज्योतिषशास्त्रमिदं प्रमुखं स्थानं भजते षडङ्गेषु । यथा शरीरे सर्वेषामपि अङ्गानां महत्त्वं वर्तते तथैव वेदस्य षडङ्गेषु शिक्षाकल्पव्याकरणादीनां सर्वेषां महत्त्वं वर्तते । किन्तु तत्र श्रेष्ठमङ्गं ज्योतिषं वर्तते यथा-

**यथा शिक्षा मयूराणां नागानां मणयो यथा ।**
**तद्वद्वेदाङ्गशास्त्राणां ज्योतिषं मुर्ध्नि संस्थितम् ।।**

एतादृशस्य महत्त्वपूर्णस्य शास्त्रस्य ज्ञानस्य आवश्यकता वर्तते सर्वेषां जनानाम् । प्राचीनकाले ज्योतिषशास्त्रस्य ज्ञानं सर्वेषां जनानां पार्श्वे आसीत् । यतः वेदस्य विभिन्नेषु सूक्तेषु अस्य शास्त्रस्य वार्त्ता विद्यते । वेदः शास्त्रविशेषस्य कश्चन ग्रन्थः न वर्तते । तत्र सर्वाणि शास्त्राणि ग्रथितानि वर्तन्ते । किन्तु सर्वेषां शास्त्राणां विभिन्नेषु स्थलेषु प्रसङ्गवशात् वर्णनमपि उपलभ्यन्ते । ज्ञायते यत् अनादिकालात् अस्य शास्त्रस्य स्थानं समाजे आसीत् ।

इदं ज्योतिश्शास्त्रं सिद्धान्त - संहिता - होरा रूपेण भागत्रयात्मकम् । तत्र सिद्धान्तभागे रव्यादिग्रहाणां गमनविशेषाः उदयास्तमयो, ग्रहणादि विशेषाः ज्ञायन्ते । संहिता भागे रव्यादि ग्रहचारवशात् भूमण्डले उत्पत्यमानानां शुभाशुभफलानां विषयाणां विचाराः वर्तन्ते । होराभागश्च प्रत्येकस्य जीवस्य जीवनकाले सम्भाव्यशुभाशुभफलानां ज्ञानद्योतकः ।

अत्र होराशास्त्रस्य प्रशंसा भिन्नभिन्नेषु ग्रन्थेषु विद्वान्सः कृतः । वराहमिहिराचार्यः बृहज्जातकग्रन्थे कथयति यथा -

**होरेत्यहोरात्रविकल्पमेके वाञ्छन्ति पूर्वापरवर्णलोपात् ।**
**कर्मार्जितं पूर्वभवे सदादि यत्तस्य पंक्ति समभिव्यनक्ति ।।**

।। बृ.जा.१/३ ।।

प्रथम पंक्तौ होराशब्दस्य स्पष्टाशय : भवति यत् अहश्च रात्रिश्च अहोरात्रि, अत्र अहोरात्रशब्दात् कथं होरा शब्दस्य निस्पत्तिर्भवति ? आद्यन्त वर्णलोपात् होरा शब्दस्य निस्पत्तिर्भवति।

सारावल्यामाचार्यः कल्याणवर्मणः लिखति यत् -

Received : 01 Sep 2019 | Published : 15 Sep 2019 | September-October 2019 [ 2 (5) : 199-203 ]

**आद्यन्तवर्णलोपाद्धोराशास्त्रं भवत्यहोरात्रात् ।**
**तत्प्रतिबद्धश्चायं ग्रहभगणश्चिन्त्यते यस्मात् ।।**

।। सारावली. २/२ ।।

अहोरात्र शब्दस्य आद्यन्तवर्णौ "अ" "त्र" यो : लोपात् होराशब्द : निष्पद्यते ।

**मेलापकविचार :**

सनातनधर्मपरम्परायाम् आश्रमव्यवस्था सर्वोत्तमा व्यवस्था : । **शतायुर्वैपुरुष :** इयं श्रुति : प्रमाणात् मानवजीवनस्य जीवनकालं चतुर्द्धा विभज्यते यथा - ब्रह्मचर्य :, गार्हस्थ्य :, वानप्रस्थ :, सन्यासश्च । प्रत्येक आश्रमस्य काल : पञ्चविंशति वर्षाणि भवति। चतुर्षु आश्रमेषु गृहस्थाश्रम : सर्वश्रेष्ठ आश्रम इति कथ्यते । यथा -

**अथात : संप्रवक्षामि गृहस्थाश्रममुत्तमम् ।**
**य आधारोऽन्याश्रमाणां भूतानां प्राणिनां तथा ।।**
**ऋण त्रयच्छेदकरी धर्म कामार्थ सिद्धिद : ।**
**एतत् सर्वं स्थितं स्त्रीषु शील वृत्तान्वितासु च ।। कश्यप : ।।**

अत्र ऋणत्रय : मानवजीवने भवति । यथा - देवऋण :, पितृऋण :, ऋषिऋणश्च।

**कश्चिद्गृहस्थाश्रमसमो नापरोऽस्ति धर्म : ।। वशिष्ठ : ।।**

**नापुत्रस्य लोकोऽस्ति ।। श्रुति : ।।**

**अनाश्रमी नतिष्ठेत क्षणमेकमपि द्विज : ।**
**आश्रमादाश्रमं गच्छेदेष धर्म : सनातन : ।। स्मृति : ।।**

धर्मशास्त्रमतानुसारे अग्निहोत्रादीनां नित्यानुष्ठेयकर्माणि स्त्रीं विना सम्पादनं कदापि असम्भवम् । अत : दारा ग्रहणं प्रत्येकानां जनानां कृते समुचितं सामाजिकं कर्त्तव्यम् । तस्मात्कारणात् प्राचीनकाले मुनय ऋषयश्च पुरुषस्य कृते स्त्री, स्त्रिया : कृते पुरुष : निर्वाचने स्त्री-पुरुषययो : भविष्यतकाले सुखसमृद्धिं प्राप्त्यर्थं या पद्धतिं निर्णितं सा पद्धति : साधारणत : मेलापक : अथवा विवाहे मेलापक : इति नाम्ना परिचिता ।

मेलापकस्य अर्थो भवति वर-वध्ययो उभयो : जन्मकुण्डलिमनुसृत्य सम्यक् अष्टविध : मेलापकानां विवाहोपयोगीविचार :। मनुसंहितायाम् आचार्य : मनु : कथयति-

**चतुर्णामपि वर्णानां प्रेत्य चेह हिताहितान् ।**
**अष्टाविमान् समासेन स्त्री विवाहान् निबोधत ।।**

**ब्राह्मोदैवस्तथैवार्ष : प्राजापत्यस्तथासुर : ।**
**गान्धर्वो राक्षसश्चैव पिशाचश्चाष्टमोऽधम : ।।(मनु०३/२१)**

एतेषां सर्वेषां विवाहानां लक्षणानि याज्ञवल्क्यस्मृतौ निम्नमते वर्णितम् । यथा-

१ - ब्राह्मविवाह : -

**ब्राह्मो विवाह आहूय दीयते शक्त्यलं कृता ।**

उपर्युक्तानां लक्षणयुक्तानां वराणां निमन्त्र्य यथाशक्ति अलंकृताकन्यादानं करणे ब्राह्मविवाह : कथ्यते ।

२ - दैवविवाह : -

**यज्ञस्थ ऋत्विजे दैव : ।**

अर्थात् यज्ञस्थ : ऋत्विजं यथाशक्ति अलंकृताकन्यां विवाह : दैवविवाह इत्युच्यते।

३ - आर्षविवाह : -

**आदायार्षस्तुन गोद्वयम् ।**

गो द्वयस्य विनिमयेन अलंकृताया : कन्याया : विवाह आर्षविवाह : कथ्यते ।

४ - काय : विवाह : प्राजापत्य : विवाह : वा -

**इत्युक्त्वा चरतां धर्मं सह यादीयतेऽर्थिने,स काय : ।**

परस्पर : मिलित्वा उभय : धर्ममाचर : इति कथयित्वा यं कन्यां प्रदीयते स : विवाह : काय : विवाह : अथवा प्रजापत्य विवाह : कथ्यते।

**आसुरो द्रविणादानात् ।**

धनं नित्वा य : कन्यादानं करोति स : विवाह : आसुर विवाह : कथ्यते ।

**गान्धर्व : समयान् मिथ : ।**

कन्या-वरयो : प्रेमसम्बन्धत्वात् विवाह : गान्धर्व : विवाह : ।

**राक्षसो युद्ध हरणात् ।**

अनिच्छुका कन्याया : युद्धेन अपहृत्वा अनीय वलपूर्वकं विवाह करणे राक्षसविवाह : कथ्यते ।

**पैशाच : कन्यका छलात् ।**

छलयित्वा कन्यामानीय विवाह : क्रियते यदि स : विवाह : पैशाच : । अयं विवाह : सर्वापेक्षा निकृष्ट अथवा अधम : विवाह : ।

विवाह : संस्कार : मानवानां जीवने षोड़शसंस्काराणां मध्ये सर्वश्रेष्ठ : संस्कार : । चतुर्णामाश्रमाणां मध्ये सर्वप्रधान : गार्हस्थ्याश्रम : वर्तते । विवाह : संस्कारात् परं गार्हस्थ्याश्रमस्य प्रारम्भो भवति । अत : वर-वध्वो : वैवाहिकसम्बन्ध : शास्त्रसम्मत : शुभसमये, शुभलग्ने यदि सम्पत्स्यते तदा सौभाग्यदायक : भवत्येव ।

**शुभक्षणक्रियारम्भजनिता : पूर्वसम्भवा : ।**
**सम्पद : सर्वलोकानां ज्योतिस्तत्र प्रयोजनम् ।। सत्याचार्य : ।।**

पुनश्च -

**शुभेऽहनि कुमारिका कर निपीड़नं कारयेत् ।**
**वरेण चिरजीविना न दोषायते ।।**
**इदं तु वहुसम्मतं मुनि वरेण गीतम् ।। भावकुतुहलम् ।।**

परन्तु गुह्यसूत्रकार : कथयति “सर्वकालमेके विवाहम् ” अस्यार्थो केवलं अष्टविवाहे आसुर :, गान्धर्व :, राक्षस :, पैशाचश्च निमित्तम् उद्दिष्टं भवति।

**प्राजापत्य ब्राह्मदैव विवाह : ऋषि संज्ञका : ।**

**उक्त कालेषु कर्त्तव्याश्चत्वार : फल दायका : ।।**
**गान्धर्वासुर पैशाच्य राक्षसाख्याश्च सर्वदा ।। नारद : ।।**

अत : वर कन्या पिता वा स्थिर चेतांसि श्रद्धया दैवज्ञ : समिपे गत्वा प्रणिपातपूर्वकं रत्न-सुवर्ण-मुद्रा-वस्त्र-फल-पुष्पादिनिवेदनं कृत्वा वर-कन्ययो : राशि-नक्षत्रं जन्मकुण्डलीं वा प्रदर्श्य विवाह : सम्बन्धीन : प्रश्न : करणीय : ।

**शुभे दिने दैवविदं त्वभिज्ञं**
**ताम्बुल-पुष्पा-क्षत पूर्णपाणि : ।**
**प्रष्टा च गत्वा प्रणिपत्य पृच्छे-**
**न्निवेद्य तस्मैवरकन्यायोर्भे ।। वशिष्ठ : ।।**

**प्रष्टामणि कनकयुतै : फल-कुसुमै : राशिचक्रमभ्यर्च्च्य ।**
**पृच्छेद्यथाभिलषितं भक्त्या विनया न्वित : प्रश्नम् ।।**
**भट्टोत्पल : ।।**

शुभसमये शुभमुहूर्त्ते दैवज्ञै : सुसमाहितभूत्वा वर-कन्ययो : जन्मकुण्डलीं सुपरीक्ष : मेलापकस्यापेक्षत्वेन सुखददाम्पत्यजीवनस्य कथं सम्भवं भवितुमर्हतीति विचिन्त्य अष्टविधमेलापकविचारं कृत्वा तत : परं मेलापकानां सर्वविधविचारं विधाय उभयो : जन्मकुण्डल्यां मङ्गलदोषविचार :, राहुदोषविचार :, शनिदोषविचार :, सप्तमभावस्य विचार :, सप्तमाधिपति विचार :,सप्तमाधिपति : यत्र वर्त्तते तस्मात् स्थानात् विचार :, सप्तमस्थग्रहस्य विचार :, जन्मलग्नविचार :, चतुर्थाधिपतिविचार :, भाग्याधिपतिविचार :, दशमाधिपतिविचार : कर्त्तव्य : । कदाचित् दैवज्ञै : विचार्यते यत् कदा वर-कन्ययो : विवाह : भविष्यति ? कस्यां दिशि विवाह : भविष्यति ? तयो : परिवारयो : किदृशौ भविष्यत : ? कन्याया : जन्मकुण्डलित : वरस्य स्वरूपं किम् ? वरस्य जन्मकुण्डलित : कन्याया : स्वरूपं किम् ? प्रेमविवाह : भविष्यति अथवा माता-पित्रो : समर्थने विवाहो वा भविष्यतीति विषया : अत्र विशद : विचार : करणीय : । उपरोक्तानां विषयाणां यदि विशदविचार : दैवज्ञै : क्रियते तदा सुखददाम्पद्यजीवनस्य परिकल्पनां कर्त्तुं शक्नुम : ।

सन्दर्भ: ग्रन्थसूची–


1 दाम्पत्य – सुख – डा. शुकदेव चतुर्वेदी – रञ्जन पब्लिकेशन्स
2 विवाहवृन्दावनम् – श्रीकेशवार्कदैवज्ञः – कृष्णदस अकादमी, वाराणसी
3 मेलापकविचार – पं परशुराम नायक
4 फलदिपीका – मन्त्रेश्वरः – व्याख्याकारः – पण्डितः गोपेशकुमारओझा – मोतिलालबनारसीदासः – दिल्ली
5 बृहद्दैवज्ञरञ्जनम् – श्रीमद्रामदीनदैवज्ञः – ँयभागः – मोतिलाल बनारसी दास – वाराणसी
6 मुहूर्त्तचिन्तामणिः – अनन्तदैवज्ञः – भारतीय विद्या प्रकाशन – वाराणसी
7 सारावली – कल्याणवर्मा – मोतीलाल बनारसी दासः, दिल्ली

8 बृहत्पाराशर–होराशास्त्रम् – पराशरः – चौखम्भासंस्कृतभवनम्–वाराणसी
9 ज्योतिषरत्नाकरः – देवकीनन्दनसिंहः – मोतीलाल–बनारसीदासः, दिल्ली
10 मुहूर्त्तमार्तण्डः – श्रीनारायणदैवज्ञः – चौखम्भा संस्कृत संस्थान – वाराणसी